को नरकः परवशता  किं सौख्यं सर्वसङ्गविरतिर्या ।
किं सत्यम् भूतहितं  प्रियं च किं प्राणिनामसवः ॥९॥

किं मरणं मूर्खत्वं  किं चानर्घं यदवसरे दत्तम् ।
आमरणात् किं शल्यं  प्रच्छन्नं यत्कृतं पापम् ॥१०॥

कुत्र विधेयो यत्नः  विद्याभ्यासे सदौषधे दाने ।
का प्रेयसी विधेया  करुणा दीनेषु सज्जने मैत्री ॥११॥

कः साधुः सद्वृत्तः  कमधममाचक्षते त्वसद्वृत्तम् ।
केन जितं जगदेतत्  सत्यतितिक्षावता पुंसा ॥१२॥

कस्मै नमांसि देवाः  कुर्वन्ति दयाप्रधानाय ।
इह भुवने कः शोच्यः  सत्यपि विभवे न यो दाता ॥१३॥

कस्य वशे प्राणिगणः  सत्यप्रियभाषिणो विनीतस्य ।
क्व स्थातव्यं न्याय्ये पथि  दृष्टादृष्टलाभाढ्ये ॥१४॥

कोऽन्धो योऽकार्यरतः  को बधिरो यो हितानि न शृणोति ।
को मूको यः काले  प्रियाणि वक्तुं न जानाति ॥१५॥

किं दानमनाकांक्षं  किं मित्रं यो निवारयति पापात् ।
कोऽलङ्कारः शीलं  किं वाचां मण्डनं सत्यम् ॥१६॥

विद्युद्विलसितचपलं किं  दुर्जनसङ्गतिश्च सम्पच्च ।
कुलशीलनिष्प्रकम्पाः के  कलिकालेऽपि सज्जना एव ॥१७॥

दानं प्रियवाक्सहितं  ज्ञानमगर्वं क्षमान्वितं शौर्यम् ।
वित्तं त्यागसमेतं  दुर्लभमेतच्चतुर्भद्रम् ॥१८॥



विद्वन्मनोहरा का  सत्कविता बोधवनिता च ।
कं न स्पृशति विपत्तिः प्रवृद्धवचनानुवर्तिनं दान्तम् ॥१९॥

कस्मै स्पृहयति कमला तु  अनलसचित्ताय नीतिवृत्ताय ।
त्यजति च कं सहसा  पितृगुरुसुरनिन्दाकरं च सालस्यम् ॥२०॥

कुत्र विधेयो वासः  सज्जननिकटेऽथवा काश्याम् ।
कः परिहार्यो देशः  पिशुनयुतो लुब्धभूपश्च ॥२१॥

को हि न वाच्यः सुधिया  परदोषश्चानृतं तद्वत् ।
किं सम्पाद्यं मनुजैः  विद्या वित्तं बलं यशः पुण्यम् ॥२२॥

का च सभा परिहार्या  हीना या वृद्धसचिवेन ।
इह कुत्रावहितः स्यात्  मनुजः किल राजसेवायाम् ॥२३॥

प्राणादपि को रम्यः  कुलधर्मः साधुसङ्गश्च ।
का संरक्ष्या कीर्तिः  पतिव्रता नैजबुद्धिश्च ॥२४॥

का कल्पलता लोके  सच्छिष्यायार्पिता विद्या ।
कोऽक्षयवटवृक्षः स्यात्  विधिवत्सत्पात्रदत्तदानं यत् ॥२५॥

किं शस्त्रं सर्वेषां  युक्तिर्माता च का धेनुः ।
किं नु बलं यद्धैर्यं  को मृत्युर्यदवधानरहितत्वम् ॥२६॥

कुत्र विषं दुष्टजने  किमिहाशौचं भवेदृणं नराणाम् ।
पातकं च किं हिंसा  भयमपि किं वित्तमेव सर्वेषाम् ॥२७॥

सम्भावितस्य मरणादधिकं किं  दुर्यशो भवति ।
लोके सुखी भवेत्को  धनवान् धनमपि च किं यतश्चेष्टम् ॥२८॥

को वर्धते विनीतः को वा हीयते यो दृप्तः ।
को न प्रत्येतव्यो ब्रूते यश्चानृतं शश्वत् ॥२९॥

कुत्रानृतेऽप्यपापं यच्चोक्तं धर्मरक्षार्थम् ।
को धर्मोऽभिमतो यः शिष्टानां निजकुलीनानाम् ॥३०॥

साधुबलं किं दैवं कः साधुः सर्वदा तुष्टः ।
दैवं किं यत्सुकृतं कः सुकृती श्लाघ्यते च यः सद्भिः ॥३१॥

को धन्यः संन्यासी को मान्यः पण्डितः साधुः ।
कः सेव्यो यो दाता को दाता योऽर्थितृप्तिमातनुते ॥३२॥

किं दुष्करं नराणां यन्मनसो निग्रहः सततम् ।
कः शूरो यो भीतत्राता त्राता च कः स गुरुः ॥३३॥

कस्य न शोको यः स्याद् अक्रोधः किं सुखं तुष्टिः ।
को राजा रञ्जनकृत् कश्च श्वा नीचसेवको यः स्यात् ॥३४॥

प्रत्यक्षदेवता का माता पूज्यो गुरुश्च कस्तातः ।
कोऽपरिहार्यो मृत्युः कुत्र पदं न्यसेच्च दृक्पूते ॥३५॥

कश्च कुलक्षयहेतुः सन्तापः सज्जनेषु योऽकारि ।
केषाममोघवचनं ये च पुनः सत्यमौनशमशीलाः ॥३६॥

इत्येषा कण्ठस्था प्रश्नोत्तरमालिका येषाम् ।
ते मुक्ताभरणा इव विमलाश्चाभान्ति सत्समाजेषु ॥३७॥

*** प्रश्नोत्तरमालिका सम्पूर्णा ***




# वेदान्त भारती

चन्द्रमौळी मार्गः कृष्णराजनगरम्
मैसूरु मण्डलम् – ५७१ ६०२


# विवेकदीपिनी

कः खलु नालंक्रियते दृष्टादृष्टार्थसाधनपटीयान् ।
अमुया कण्ठस्थितया प्रश्नोत्तररत्नमालिकया ॥१॥

भगवन् किमुपादेयं गुरुवचनं हेयमपि च किमकार्यम् ।
को गुरुरधिगततत्त्वः शिष्यहितायोद्यतः सततम् ॥२॥

कः पथ्यतरो धर्मः कः शुचिरिह यस्य मानसं शुद्धम् ।
कः पण्डितो विवेकी किं विषमवधीरणा गुरुषु ॥३॥

किं मनुजेषु इष्टतमम् स्वपरहिताय उद्यतं जन्म ।
के च दस्यवो विषयाः को वैरी यस्त्वनुद्योगः ॥४॥

कस्माद् भयमिह मरणात् अन्धादिह को विशिष्यते रागी।
किं दुःखमसन्तोषः किं लाघवमधमतो यांचा ॥५॥

पातुं कर्णाञ्जलिभिः किम् अमृतमिह युज्यते सदुपदेशः ।
किं गुरुताया मूलं यदेतदप्रार्थनं नाम ॥६॥

किं जीवितमनवद्यं किं जाड्यं पाठतोऽप्यनभ्यासः ।
को जागर्ति विवेकी का निद्रा मूढता जन्तोः ॥७॥

नलिनीदलगतजलवत्तरलं किं यौवनं धनं चायुः ।
कोऽनर्थफलो मानः का सुखदा साधुजनमैत्री ॥८॥